# पथ्यास्वस्ति : एकम् अनुशीलनम्

**डॉ. रघुवीरप्रसाद शर्मा**
अध्येता - पं. मधुसूदन ओझा साहित्य

पं. मधुसूदन ओझा विरचितः 'पथ्यास्वस्ति' नामको ग्रन्थोऽपि शिक्षाव्याकरणयोः प्राकरणिकविषयाणां प्रतिपादनमुद्दिश्य लिखितोऽस्ति। ग्रन्थोऽयं पञ्च प्रपाठकेषु प्रविभक्तो वर्तते -

1) मातृकापरिष्कार 2) यमपरिष्कारः

3) गुणपरिष्कारः 4) अक्षरनिर्देशः

5) सन्धिपरिष्कारश्च

शब्दब्रह्मनिरूपणार्थं वैदिक वर्णमातृकाविवेचनमेव मातृकापरिष्कारस्य मुख्यं प्रतिपाद्यम् अस्ति। आचार्यः पंतजलिः वर्णसमाम्नायं नित्यं प्रतिपादयति कथयति च -'सिद्धे शब्दार्थसम्बन्धे' इति। पं. ओझामहोदया अमुं स्पष्टीकुर्वन्ति पातञ्जलमतं च समर्थयन्ते यत् वर्णा नोत्पद्यन्ते स्थानप्रयत्नसंयोगात्ते केवलं व्यक्ता भवन्ति। एवं च उत्पत्तिपक्षनिराकृतेरेव शब्दनित्यत्वं प्रमाणितं भवति। अन्यथा तु वर्णोत्पत्तिपक्षस्वीकारे सति वर्णोच्चारणानन्तरं वर्णध्वनिविनाशक्रमेणान्ते शब्दध्वनिविनाशे शब्दविनाशस्योपक्लृप्त्या शब्दानित्यत्वं स्यात्।

वर्णसमाम्नायविवेचनप्रणाल्यां ओझामहोदया अयोगवाहानां विषयं प्रस्तुवन्ति। तत्त्वबोधिनीकारमतं प्रस्तूय अयोगवाहान् परिभाषते -

**'अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां ते अयोगाः अनुपदिष्टत्वात्। उपदिष्टैरगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः।'**[1]

अस्य तात्पर्यमिदमस्ति यत् ये वर्णा लोके शास्त्राध्ययने च व्यवह्नियनते ते अयोगवाहाः। योगवाहास्तु प्रत्याहारादिषूक्ताः। एते चायोगवाहाः 'यदयुक्ता वहन्ति अनुपदिष्टाश्च श्रूयन्ते' इति पाणिनीयशिक्षा-

वचनानुसारमाश्रयस्थानभागिनो मन्तव्याः। पं. ओझा नव अयोगवाहानां प्रतिपादनं कुर्वन्ति[2] -

**(1) स्वरभक्तिः (2) रङ्गः (3) अनुस्वारः (4) विसर्गः (5) औरस्यः (6) उष्मा (7) जिह्वामूलीयः (8) उपध्मानीयः(9) यमश्च।**

अयोगवाहानां नवधात्वं प्रतिपाद्य ते एकादशवर्णानामयोगवाहत्वं निर्दिशन्ति। तद्यथा -ऋलृ र्ह इति स्वरभक्तिः। आँ ईं, ऊँ इति रङ्गः। अं अःइत्यनुस्वारविसर्गौ। ह्न ह् इत्यौरस्योष्माणौ। क  प इति जिह्वामूलीयोपध्मानीयौ। कुं खुं गुं घुं इति यमाः। इत्थमेकादश अयोगवाहाः। यद्यपि भाष्यकारः केवलं विसर्ग-जिह्वामूलीय-उपध्मानीय-अनुस्वार-अनुनासिक-यमानामेवायोगवाहत्वं स्वीकुर्वन्ति, किन्तु पं. ओझा स्वरभक्तिरंगौरस्योष्मणामपि अयोगवाहत्वं स्वीकुर्वन्ति, अपि च अनुनासिकवर्णानामयोगवाहत्वं निराकुर्वन्ति। उल्लिखन्ति च भाष्यकारमतपरिशुद्धिम्-

**'इमे योगवाहा न क्वचिदुपदिश्यन्ते श्रूयन्ते च। तेषां कार्यार्थमुपदेशः कर्त्तव्यः। के पुनरयोगवाहाः। विसर्जनीय-जिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः । कथं पुनरयोगवाहाः। यदयुक्ता वहन्ति अनुपदिष्टाश्च श्रूयन्ते।'**

यमपरिष्कारान्तर्गतं सर्वप्रथमं यममेवैवं परिभाषते -

**'अनासिक्यस्पर्शादुत्तरतो नासिक्यस्पर्शे सति मध्ये पूर्वसदृशो वर्णो विच्छेदं जनयन्नुच्चार्यमाणो यम उच्यते।[4]'**

एते यमाःप्रायेण स्थानकरणयोः स्पर्शेणोत्पद्यन्ते। अत्र विशेषं निर्दिशति यत् स्पर्शवर्णानन्तरं यदा यमवर्णः स्यात् तदा सः स्थानकरणस्पर्शविच्छेदेनोत्पद्यते पूर्वस्पर्शवर्णसादृश्यमाप्नोति च। एवं चेन्निष्कृष्टं वक्तुं शक्यते यत् स्थानकरणयोः स्पर्शविच्छेदेन उत्पद्यमानः प्रतिध्वनिर्यद्यपि पदान्ते, अन्तःस्थे परे सति, अथवा च पञ्च मतानि उल्लिखन्ति। अन्ते च स्पष्टं कुर्वन्ति यत् एभिर्मतैः सिद्धं भवति यत् यमः स्वतंत्रो न प्रयुज्यते। यमवर्णात् पूर्वं अन्य वर्णोऽनिवार्यो भवति। अतएव सिद्धान्तकौमुद्यां यमस्य 'घ्नन्ति' इत्युदाहरणमुचितं नास्ति। तत्र 'निघ्नन्ति' इति प्रयोगोऽवधेयः। एवमेव 'ज्ञानम्' इत्यादि पदे ज्ञकारस्य यमत्वं निराकरोति। अत्र यज्जकारो वर्तते, तत् अनुनासिकं तालव्य ईषत्स्पृष्टप्रयत्नवान् ञकारेण युक्तोऽस्ति, अतएवात्र यमो न मन्तव्यः।

गुणपरिष्कारान्तर्गतं पं. ओझा महोदया मन्त्रजिज्ञासाविषये स्वाभिमतं प्रस्तौति। स कात्यायनमतेन

मन्त्रसाफल्याय के के विषया ध्यातव्या इति निर्दिशति।यथा -

**''स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगोऽर्थ एव च।**
**मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे।।**

**वेदस्याध्ययनाद् धर्मः सम्प्रदानात्तथा श्रुतेः।**
**वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशोऽपि च।।**[5]

अर्थात् मन्त्रजिज्ञासुः पदेषु प्रत्येकं प्रकृति-प्रत्यय-स्वर-वर्ण-अक्षर-मात्रा-प्रयोग-अर्थप्रभृतीनां पूर्णमवधानं कुर्यात्। एषामुचितत्वमेव मन्त्रसाफल्यं प्रददाति। अत्र स्वरपदमक्षरबोधकोऽपि सन्नर्थान्तरेणोदात्तानुदात्तादीनामपि ज्ञानं कारयति। अस्मिन् सन्दर्भे भाष्यकाराभिमतं मतं प्रस्तौति -

**''मन्त्रो हीनः स्वरतो वर्णतो वा**
**मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति**
**यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**[6]''

अक्षरपरिष्कारान्तर्गतं प्रतिपादितं यत् क्षरो व्यंजनम् अक्षरश्च स्वरः। क्षरोऽक्षरस्याधारः। एवं च स्वराधारो व्यञ्जनमिति सिद्ध्यति। किन्तु आधारत्वेऽपि नेदं नित्यम्। यतो हि क्षराणां नियन्ताऽक्षरः स्वर एव। अतएव श्रीमद्भगवद्गीतायामपि 'कूटस्थोऽक्षरमुच्यते' इत्युक्तम्। तत्रैव च क्षरः सर्वाणि भूतानि इत्युक्त्वा व्यंजनानां महत्त्वमपि निर्दिष्टं, किन्तु स्वरव्यञ्जनानां सर्वेषां वर्णानां मूलम् अकार उक्तः'अक्षराणामकारोऽस्मीति'।

अकारात्प्रस्तारं प्राप्ते वर्णसमाम्नाये मातृकानुसारं अक्षराणां संस्थितिरभिमता। तथा हि ब्रह्ममातृकायां अक्षरसमाम्नायस्य मातृकातोऽभिन्नत्वमपि प्रतिपादितम्। तद्यथा - **'सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः कलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। माता पितरौ चास्य स्वर्गे लोके महीयेते।**[7]'

एवमेवाक्षराणां संख्याविषयेऽपि निर्दिष्टम् -

**'एकोनाशीति वर्णास्तु प्रोक्ताश्चात्र स्वयम्भुवा ।**

**स्वरा द्वाविंशतिश्चैव स्पर्शानां पञ्चविंशतिः।।**

**यादयः शादयश्चाष्टौ यमा विंशतिरेव च।**

**अनुस्वारो विसर्गश्च क×पौ चापि पराश्रयौ।।[8]'**

एवं ब्रह्ममातृकायां 79 वर्णानां निर्देशो विहितः। तथैव च अक्षरमातृकायामेकपंचाशत् वर्णाः प्रतिपादिताः। रुद्रमातृकायां 43 वर्णा अभिमताः। भूतमातृकायां तु साकल्येन 42 वर्णा आसन्निति ते उल्लिखन्ति। ज्योतिः शास्त्रोक्तायां हीनमातृकायां 112 वर्णा भवन्ति इत्यपि ओझा महोदयाः स्पष्टीकुर्वन्ति।

सन्धिपरिष्कारे ओझामहोदयाः सन्धीनां मूलकारणमाधारञ्च विवेचयन्ति। तैरिदं सिद्धान्ततः प्रतिपादितं यत् क्षरैर्व्यञ्जनवर्णैरिन्द्रियग्राह्यस्याक्षरस्याभिव्यक्तिर्भवति। स्वरास्तत्राक्षरास्ते स्वतः स्फूर्त्ता भवन्ति। त एव व्यञ्जनवर्णैरग्राह्यं प्राणमभिव्यञ्जयितुं समर्थाः सन्ति, अतएवोक्तं स्वतो राजन्ते इति स्वराः' 'व्यज्यते प्राणःअनेनेति व्यञ्जनम्' इति च। क्षराक्षरयोःस्वरव्यञ्जनयोराधारेण सन्धिरपि मूलतो द्विधैव वर्तते-स्वरसन्धिः व्यञ्जनसन्धिश्च। तत्र स्वरसंधिः केवलं संहितायामेव भवति। यत्र द्वयोः स्वरप्राणयोरेकप्राणत्वेनाभिसम्बन्धः स्यात्तत्र स्वरसन्धिर्मन्यते। एवमेव यत्र द्वयोरक्षरयोर्व्यञ्जनयोरेकेनान्यस्य निग्रहणं तत्र व्यञ्जनसन्धिर्भवति।

पं. ओझामहोदयैर्बलाधारेणापि सन्धेर्द्वैविध्यं प्रतिपादितम्-आरम्भकं विशेषकं च । अनयोर्यदारम्भकं तत्पञ्चविधमुक्तम्-स्वरोपधायकम्, अंगोपधायकम्, स्पर्शोपधायकं, स्थानोपधायकं, नादोपधायकं च। विशेषकमपि पुनःपञ्चधोक्तम् आगमः, उपघातकः, विक्षेपकः, विशेषाधायकः, निरोधकश्चेति। एत एव क्रमेण वर्णागमः, लोपः, विपर्ययः, आदेशः, प्रकृतिभावश्चोच्यन्ते। एवं वाक्पदिकोक्तः पथ्यास्वतिग्रन्थो व्याकरणाध्येतृणां कृते तूपादेयोऽस्त्येव वेदाध्यायिनां कृतेऽपि सुगमतया वैदिकं व्याकरणं बोद्धुम् उपयुक्तोऽस्ति।

**सन्दर्भाः**

1. पथ्यास्वस्ति / पृ. 11
2. पथ्यास्वस्ति / पृ. 17
3. पथ्यास्वस्ति / पृ. 22
4. पथ्यास्वस्ति / पृ. 36
5. पथ्यास्वस्ति / पृ. 49
6. पथ्यास्वस्ति / पृ. 56, निरुक्त (प्रथमाध्याय)
7. पथ्यास्वस्ति / पृ. 61-62
8. पथ्यास्वस्ति / पृ. 77-78